# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –आचार्य–१ (SEM-१) | प्रश्नपत्रम् – ३ | |
| विषयः – नव्यन्यायः | (C.C- 4.1.2 ) **सन्दर्भग्रन्थः– हेत्वाभाससामान्यनिरुक्तिः** | गुणाः – ७० |
| दिनाङ्कः – ११/१०/२०१९ | | समयः– ८ तः ११ |

### (विभागः-1)

**प्र-1 एकः प्रश्नः समाधेयः । 05**

1. सोदाहरणं हेतोः पञ्चधर्मान् विशदयत ।
2. यथाग्रन्थं दुष्टहेतून् निरूप्यताम् ।

**प्र-2 एकः प्रश्नः समाधेयः । 10**

1. "अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्" इति मणिवचनं विशदयत ।
2. अनुमितिकारणीभूतस्य परामर्शस्य कारणत्वं स्पष्टयत ।

### (विभागः-2)

**प्र-3 एकः प्रश्नः समाधेयः । 05**

1. प्रतियोगितावच्छेदकत्वस्य कृत्यं ब्रूत ।
2. द्वितीयलक्षणे पर्वतो वह्निमान् इत्यत्र अतिव्याप्तिः कथम् ? व्याख्यात ।

**प्र-4 एकः प्रश्नः समाधेयः । 10**

1. "भ्रमात् प्रतिबन्धऽपि न क्षतिः" व्याख्यात ।
2. "यद्विषयकत्वेन लिङ्गज्ञानस्यानुमिति प्रतिबन्धकत्वं तत्त्वम्" व्याख्यात ।

### (विभागः-3)

**प्र-5 एकः प्रश्नः समाधेयः । 05**

1. समन्वयपुरस्सरं बाधलक्षणं व्याख्यात ।
2. यद्रूपावच्छिन्ने द्वितीयलक्षणस्य समन्वयं कुरुत ।

**प्र-6 एकः प्रश्नः समाधेयः । 10**

1. काञ्चनमयः पर्वतो वह्निमान् धूमात् --- इत्यत्र समन्वयं कुरुत ।

2. अनुमितिप्रतिबन्धकान् विवेचयत ।

**(विभागः-4)**

**प्र-7 एकः प्रश्नः समाधेयः । 05**

1. साध्यनिश्चयानन्तरं कथमनुमितिः उदेति ? व्याख्यात ।
2. प्रत्येकं हेत्वाभासापत्तिं व्याख्यात ।

**प्र-8 एकः समाधेयः । 10**

1. सोदाहरणं हेत्वाभासतृतीयलक्षणं व्याख्यात ।
2. पक्षतावच्छेदकवैशिष्ट्यादिकञ्च वैज्ञानिकम् , न तु वास्तवं ग्राह्यम् । व्याख्यात ।

**प्र-9 दश प्रश्नाः समाधेयाः । 05**

1. दीधितिकारः कः ?
2. हेत्वाभासप्रथमं लक्षणं किम् ?
3. किन्नाम तत्वनिर्णयः ?
4. भ्रमपदस्य कोऽर्थः ?
5. आश्रयासिद्धेरुदाहरणं किम् ?
6. तृतीयं लक्षणं किम् ?
7. प्रतिबन्धकलक्षणं किम् ?
8. स्वरूपासिद्धेः स्वरूपं किम् ?
9. हेत्वभासनिरुक्तिग्रन्थः मणौ कस्मिन् भागे वर्तते ?
10. अनुमितेराकारः कः ?
11. किन्नाम दुष्टहेतुः ?
12. व्यभिचारस्वरूपं किम् ?
13. सत्प्रतिपक्षंः कस्य प्रतिबन्धकम् ?
14. द्वितीयलक्षणं किम् ?
15. हेत्वाभासाः के ?

******************

## उत्तराणि

1. रघुनाथ शिरोमणिः ।
2. अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् ।
3. साध्यवत्ताज्ञाने प्रमात्वनिश्चयः ।
4. मिथ्याज्ञानम् ।
5. गगनारविन्दं सुरभिः अरविन्दत्वात् ।
6. ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वम् ।
7. कारणीभूताभावप्रतियोगित्वम् ।
8. पक्षे हेत्वभावः ।
9. अनुमानखण्डे ।
10. पक्षः साध्यवान् ।
11. असद्हेतुः ।
12. साध्याभाववद् वृत्त्वम् ।
13. अनुमितिप्रतिबमन्धकम् ।
14. यद्विषयकत्वेन लिङ्गज्ञानस्यानुमिति प्रतिबन्धकत्वं तत्वम् ।
15. सव्यभिचार-विरुद्ध-सत्प्रतिपक्षासिद्धबाधिताः ।